International Journal of Sanskrit Research 2020; 6(1): 66-69
भारत।

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(2): 66-69
© 2020 IJSR
www.anantaajournal.com
Received: 01-01-2020
Accepted: 05-02-2020

अनुप बाइल
विद्यावारिधिच्छात्रः
शिक्षाशास्त्रीविभागः
राष्ट्रियसंस्कृतसंस्थानम्,
श्रीसदाशिवपरिसरः,पुरी, ओडिशा,
भारत।

# व्यावसायिकनिर्देशने वृत्तिसम्बन्धीयतथ्यानां संग्रहणस्योपायाः

अनुप बाइल

## सारांश
इदानीन्तनकाले आबालवृद्धेभ्यः व्यावसायिकनिर्देशनस्य नितरामावश्यकता वर्तते। व्यावसायिकनिर्देशनेन सर्वे जनाः जीवने समुचितं दिशां प्राप्नुवन्ति। निर्देशनमेतत् वैयक्तिकं सामूहिकं च भवितुमर्हति। व्यावसायिकनिर्देशनं विना व्यक्तेः भविष्यजीवनं दुःखमयं भवति। विविधेषु व्यवसायेषु कीदृशी क्षमता दक्षता च अपेक्षते एवञ्च विविधं वृत्तिक्षेत्रं यत् सर्वेषामज्ञातमिति, तद्विषये साहाय्यं करोति। व्यवसायस्य प्रकृतिः, परिवेशः, योग्यता, प्रशिक्षणस्यावश्यकता, विपदः आशङ्का अस्ति न वा प्रभृति वृत्तिसम्बन्धीयतथ्यानां स्रोतांसि कुत्र विद्यते, तथ्यानि संग्रहणं कथं भवितुं शक्यते तद्विषये सम्यग्रूपेण न जानन्ति। अतः वृत्तिसम्बन्धीय-विविधानि तथ्यानि यथा- मेधावृत्तिः, अध्येतावृत्तिः, व्यवसायस्य प्रकृतिः, प्रशिक्षणस्य योग्यता इत्यादयः विषयाः संवादपत्रे, वेतारे, 'दूरदर्शने, कर्मविनियोगसंस्थायाम्, कर्मसम्बन्धीयविशेषवुलेटिनमध्ये, राष्ट्रियशिक्षानुसन्धानम् एवञ्च प्रशिक्षणपर्षदि, विविध शिल्पसंस्थायाम्, विविधविद्यालये, महाविद्यालये, विश्वविद्यालये प्राप्तुं शक्यते। येन माध्यमेन व्यावसायिकनिर्देशनप्रार्थिणः तेषाम् आवश्यकता पूरयितुं शक्यते।

कूटशब्दाः वृत्तिविश्लेषणम्, वृत्तिसम्बन्धीयतथ्यानामवधारणा, वृत्तिसम्बन्धीयतथ्यानां संग्रहणस्योपायाः।

**Corresponding Author:**
अनुप बाइल
विद्यावारिधिच्छात्रः
शिक्षाशास्त्रीविभागः
राष्ट्रियसंस्कृतसंस्थानम्,
श्रीसदाशिवपरिसरः, पुरी, ओडिशा,

## प्रस्तावना
अस्मिन् विशाले प्रपञ्चे सुखाभिलषिते मानवसमाजे सम्परिवर्धिता जनसंख्या महती समस्या समुत्पादयति। मानवस्य मौलिकसौकर्यभूतानि खाद्यवस्त्रनिवासरूपाणि न हि सर्वैः मनुष्यैः

सम्यगुपलभ्यन्ते। अस्मिन् जगति परिवेशप्रदूषणम्, विश्वोष्णायनम्, वित्तसमस्या, वृत्तिसमस्या, नैतिकसमस्या इत्यादयः विविधाः समस्याः प्रतिदिनम् अभिवर्धन्ते। एतादृशीनां विविधानां समस्यानां समाधानाय विवेकशीलः मानवसमाजः बहुविधोपायान् अन्विषन् वर्तते। एतासु समस्यासु वृत्तिसमस्या अपि महती समस्यारूपेण दृश्यते । वृत्तिनिर्देशनेन यस्य प्रयोजनमस्ति स न जानाति समस्यायाः समाधानाय वृत्तिसम्बन्धीयतथ्यानि कुत्र सम्यगुपलभ्यन्ते। तेषां वृत्तिसम्बन्धीयतथ्यानां प्राप्त्यर्थम् एवञ्च संग्रहणार्थम् विविधाः स्रोतांसि वर्तन्ते । येन स अनायासेन स्वीयसमस्यां दूरीकर्तुं शक्यते ।

वृत्तिविश्लेषणम्:-

**J.D. Hackett** महोदयानुसारम्- वृत्तिसम्बन्धीयं गुरुवपूर्णतथ्यं निर्दिष्टकरणम् एवञ्च वृत्तौ सफलतामर्जयितुं यया योग्यतया प्रयोजनं, तदेव निर्दिष्टकरणमेव वृत्तिविश्लेषणम्।

[1] ‘‘Job analysis involves a determination of the essential elements in the job and the qualification a worker should have for its successful performance.’’-J.D.Hackett.

Ordway Tead महोदयानुसारम्- वैज्ञानिकरुपेण वृत्तिम् अधीत्य वृत्तिविषयः एवञ्च परिवेशः केनोपायेन वृत्तिमुपरि प्रभावयति तद्विषये अवगमनमेव वृत्तिविश्लेषणम्।

[2]"The scientific study of all the facts about a job which reveal its content and modifying factors which surround it.’’ - Ordway Tead.

उक्तपरिभाषातः वक्तुं शक्यते, वृत्तिविश्लेषणमेका प्रक्रिया यया वृत्तिवैशिष्ट्यम्, एवञ्च वृत्तौ सफलं भवितुं कीदृशं ज्ञानं, कीदृशी योग्यता, दक्षता च अपेक्षते तत् सुष्ठुरुपेण ज्ञायते।

वृत्तिसम्बन्धीयतथ्यानामवधारणाः

मायर्समहोदयानुसारं व्यावसायिकनिर्देशनं व्यक्तेः कृते महतीम् आत्मतृप्तिं प्रददाति। परन्तु अनेन निर्देशनेन केवलम् आत्मतृप्तिं नैव प्राप्यते, यावत्पर्यन्तं व्यावसायिक निर्देशनप्रार्थी: निर्देशनानुसारं वृतिसम्बन्धीयतथ्यानि संग्रहीतुं न शक्यते। बृत्तिसम्बन्धीयतथ्यानां स्रोतांसि कुत्र विद्यते शिक्षार्थिणः सम्यग्रूपेण न जानन्ति। अतः आदौ वृत्तिचयनादनन्तरं तद्सम्बन्धीयतथ्यानां संग्रहविषये ज्ञानमावश्यकम्।

वृत्तिनिर्देशानाय द्विविधतथ्यैः प्रयोजनमस्ति। यथा- निर्देशनप्रार्थिणः आत्मतथ्यानि एवञ्च (२) वृत्तिसम्बन्धीयतथ्यानि।

(१) निर्देशनप्रार्थिणः आत्मतथ्यानिः

→परिवारसम्बन्धीयतध्यानिः- शिक्षार्थिणः नाम, वयः, लिङ्गञ्च, मातापितरौ नाम, मातापितरौ सम्बन्धः कीदृशः, परिवारस्य अन्यानां सदस्यानां नाम, शैक्षिकयोग्यता इत्यादयः।

→निर्देशनप्रार्थिणः जन्मसम्बन्धीयतथ्यानिः- गर्भावस्थायां मातुः शारीरिकी मानसिकी अवस्था, शिक्षार्थीः स्वाभाविकरुपेण जायते न वा, शिक्षार्थीः जातपुत्र; उत वा पालितपुत्रः इत्यादयः ।

→निर्देशनप्रार्थिणः स्वास्थ्यसम्बन्धीयतथ्यानिः- शिक्षार्थिणः स्वास्थ्यसम्बन्धीयः इतिहासः, कठिनव्याधिः अस्ति न वा, शिक्षार्थिणः शारीरिक-समस्या, शारीरस्य वर्तमानस्थितिः इत्यादयः।

→मानसिक-तथ्यानिः- आत्मनं प्रतिपादनेच्छा, शिक्षार्थिणः बुद्धिः, आग्रहः, चरित्रम्, आत्मविश्वासः, इत्यादयः।

→शिक्षासम्बन्धीय- तथ्यानिः- शिक्षार्थिणः श्रेण्यां स्थानम्, कस्यां कक्षायां पठति, कदापि परीक्षायामसफलमभवत् न वा इत्यादयः।

→शिक्षार्थिणः अस्वाभाविकव्यवहारसम्बन्धीयतथ्यानिः- शिक्षार्थीः अत्याधिकं संशययुक्तं न वा, निद्राकालीनभ्रमणम्, अपराधमूलकप्रवृत्तिः, आत्मनं प्रति हीनभावना इत्यादयः।

---

[1] .निर्देशनं परामर्शश्च डॉपाल देवाशीष., सैन्ट्राल लाइब्रेरी, कलकाता, २०१०

[2].तत्रैव

→सामाजिकविकाससम्बन्धीयानि तथ्यानि:- विद्यालयस्य पाठक्रमेण सह विविधेषु कार्येषु भागग्रहणेच्छा, सामाजिक-सहयोजनस्य क्षमता इत्यादयः।

→वृत्तिसम्बन्धीयतथ्यानि:- वृत्ति सम्बन्धीयानि कानि कानि तथ्यानि ज्ञातव्यानि एवञ्च ज्ञापनीयानि तद्विषये अधः प्रस्तूयते-

- चितव्यवसायस्य सौविध्यम् आवश्यकताञ्च अस्ति न वा।
- विविधस्य व्यवसायस्य कृते कीदृशी शैक्षिकयोग्यता अपेक्षते।
- व्यवसायस्य कृते प्रशिक्षणसौविध्यमस्ति न वा।
- प्रशिक्षणं कुत्र प्राप्यते, केनोपायेन प्रशिक्षणं प्राप्तुं शक्यते।
- व्यवसायस्य सौविध्यमसौविध्यं कीदृशम् अस्ति।
- मेधावृत्तेः एवञ्च अध्येतावृतेः सौविध्यं कुत्र प्राप्यते।
- आगामिनिकाले व्यवसायस्य प्रभावः कीदृशः।
- कस्मिन् व्यवसाये स्वास्थ्यहानेः एवञ्च विपदः आशङ्का अस्ति तद्विषये सूचनाप्रदानम्।
- व्यवसायस्य गुरुत्वम्, कर्मणः परिवेशः, कर्मविनियोगकेन्द्राः कुत्र विद्यन्ते इत्यादयः विषयाः अवश्यमेव ज्ञातव्यम्।

वृत्तिसम्बन्धीयतथ्यानां संग्रहणस्योपायाः-

वृत्तिविषये यैः तथ्यैः प्रयोजनम् एवञ्च केनोपायेन तानि तथ्यानि संग्रहीतुं शक्यते तद्विषये अधः प्रस्तूयते-

→व्यवसासम्वन्धीयविविधानि तथ्यानि विविधगणमाध्यमेन प्राप्यते। यथा- कर्मणः प्रकृतिः, कर्मणः जगत् इत्यादयः विषयाः संवादपत्रे, वेतारे, दूरदर्शने, संगणके, कर्मसम्बन्धीयविशेषबुलेटिनमध्ये प्राप्तुं शक्यते।

→राष्ट्रियशिक्षानुसन्धाने एवञ्च प्रशिक्षणपर्षदि, राज्यस्तरीया शिक्षा एवञ्च वृत्तिनिर्देशनसंस्थायाम्, Director General Employment & Training मध्ये, YMCA एवञ्च निर्देशनसम्बन्धीयस्वेच्छासेवीसंस्थया प्रकाशितं वुलेटिनमध्ये विविधानि तथ्यानि प्राप्यन्ते।

→शिक्षा एवञ्च प्रशिक्षणसमबन्धीयतथ्यानि सर्वकारीय तथा असर्वकारीयविविधशिक्षासंस्थायाम् एवञ्च प्रशिक्षणसंस्थायाम्, महाविद्यालये, विश्वविद्यालये एवञ्च मध्यशिक्षापर्षदि प्राप्यन्ते।

→वृतिवैशिष्ट्यानुसारेण तथ्यानि विविधव्यवसाये निस्नातव्यक्तेः कथनात्, शिल्पसंस्थातः, आइ.टी. आइ एवश्च कर्मविनियोगसंस्थातः प्राप्तुं शक्यते।

→केन्द्रसर्वकारेण राज्यसर्वकारेण च साहाय्यप्राप्तसंस्थाः यथा- **CSIR, U.G.C, N.C.E.R.T.,** महाविद्यालयतः, विश्वविद्यालयतः, अन्तराष्ट्रियसंस्थातः मेधावृत्तिः । एवञ्च अध्येतावृत्तिसम्बन्धीयतथ्यानि संग्रहीतुं शक्यते।

वित्तकोषे तथा अन्यान्यार्थिकसंस्थायाम् विविधशिल्पप्रतिष्ठाने च मेधावृतेः तथा अध्येतावृत्तेः सौविध्यमस्ति उत वा ऋणप्रदानस्य व्यवस्था अपि अस्ति। अतः अनेन प्रतिष्ठानेन साकं सम्बन्धः स्थापनीयः।

→विविध-विनियोगकारी-संस्थायाः [3] (Employing Authority) जनसंयोगी- विभागात् व्यावसायिकतथ्यानि संग्रहयितुं शक्यते।

→'Job Profile' मध्येऽपि तथ्यानि प्राप्तुं शक्यते। यथा व्यवसायस्य प्रकृतिः, शैक्षिकयोग्यता, कीदृशं प्रशिक्षणमावश्यकम्, कुत्र प्रशिक्षणं प्राप्तुं शक्यते, वेतनम्, पदोन्नतिः इत्यादयः विषयाः Job profile मध्ये उल्लिखितं भवति । अनेनोपायेन समयस्य, धनस्य, श्रमस्य च अपव्ययं निवारयति।

→व्यावसायिकतथ्यसंग्रहणस्य कृते महान् स्रोतः भवति अन्तर्जालम्। इदानीं प्रत्येकं संस्थायाः 'वेवसाइट' (**Website**) इति अस्ति। यत्र संस्थया विविधतथ्यानि दीयते। अनेनोपायेन व्यावसायिकतथ्यानि प्राप्यन्ते।

---

[3].निर्देशनम् एवं परामर्शदानम् (Guidance and Counselling)-मुखोपाध्याय काकलि, कलकाता,२०१६

→कर्मरतानां जनानां पर्यवेक्षणेन एवञ्च कर्मस्थानं परिदर्शनेन वृत्तिसम्बन्धीयानि प्राथमिकतथ्यानि प्राप्यन्ते।

→व्यावसायिकनिर्देशनाय कर्मविनियोगसंस्थाया: (Employment Exchange) नितरां महत्वमस्ति। १९५२ तमे वर्षे- 'Training and Employment Service Committee' स्थापितमासीत्।

इत्यानुसारेण विद्यालयात् महाविद्यालयात् आगतानां शिक्षार्थीनां वृत्तिसम्बन्धीयानां विविधप्रश्नानाम् उत्तरप्रदाने तथा वृत्तिचयने वृत्तिविनियोगसंस्था विविधोपायेन साहाय्यं करोति।

→वृत्तिसम्बन्धीयानि तथ्यानि प्रचाराय वृत्तिमेलाया: आयोजनं क्रियते। व्यवसायस्य श्रेणीकरणम्, वैशिष्ट्यम्, योग्यता, वेतनम्, पदोन्नतिः प्रभृतिः तथ्यानि प्रश्नोत्तरमाध्यमेन उपस्थाप्यते।

अतः वक्तुं शक्यते यत् वृत्तिसम्बन्धीयतथ्यानि संग्रणस्योपायाः सम्यग्रुपेण जानीयुः। अनेन माध्यमेन तथ्यसंग्रहणे सत्यता, विश्वसनीयता दृश्यते।

## संदर्भ


1. रेड्डी, नागमुनि पि.- शिक्षामनोविज्ञानम्(२००६)
2. पाठक पी.डी.-शिक्षामनोविज्ञान- **vinod pustak Mandir, Agra-2005**
3. डॉ. पाल-देवाशीष-निर्देशनं परामर्शश्च- सेन्ट्रल लाइब्रेरी (२०१०)
4. डॉ. दे. रणजित-शिक्षायां व्यावसाये च निर्देशनम्- रीता पब्लिकेशन्स्।
5. Kochhar SK. Guidance and Counselling in College and Universites, -New Delhi: Sterling Publishers.
6. Sharma Ramanath, Sharma Rachana -Guidance and counselling in India - Atlantic publishers.
7. Agarwal JC. Educational Vocational Guidance and Counselling - Doaba House publishers, 1987.
8. मुखोपाध्याय काकलि-Guidance and Counselling- कलकाता २०१६